"शृङ्गिदंष्ट्रिनखिव्यालविषवह्निस्त्रिया जलैः। आदरात् परिहर्त्तव्यः कुर्वन् क्रीड़ां मृतस्तु यः। नागानां विप्रियं कुर्वन् दग्धश्चाप्यथ विद्युता। निगृहीतः स्वयं राज्ञा चौर्य्यदोषेण कुत्रचित्। परदारान् रमन्तश्च द्वेषात्तत्पतिभिर्हताः। असमानैश्च सङ्कीर्णैश्चाण्डालाद्यैश्च विग्रहम्। कृत्वा तैर्निहतास्तांस्तु चाण्डालादीन् समाश्रिताः। गवाग्निविषदाश्चैव पाषण्डाः क्रूरबुद्धयः। क्रोधात् प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम्। गिरिवृक्षप्रपातञ्च ये कुर्वन्ति नराधमा" इति।

**अपमृषित** त्रि० न० अप+मृष–क्त वाक्ये वाच्ये नि०। क्षान्ते वाक्ये। अन्यत्र अपमृष्टमित्येव सोढ़े क्षान्ते परामृष्टे च।

**अपयशस्** न० अपकृष्टं यशः। "यशोविपरीतायामकीर्त्तौ 'अपयशो यस्यास्ति किं मृत्युना" इतिनीतिः। अपगतं यशो यस्य। कीर्त्तिशून्ये त्रि०। [अकीर्त्तिहेतौ।

**अपयशस्कर** त्रि० न यशस्करः कृ–हेतौ ट विरोधे न०।

**अपयान** न० अप+या–भावे ल्युट्। अपक्रम्य पलायने "अपयानेऽपि न भवान् समर्थो लघुविक्रय" इति रामा०।

**अपर** न० न पूर्य्यते यतः पृ–अपादाने, अप्। गजस्य पश्चाद्भागे। "बद्धापराणि परितो निगडान्यलावीदिति" माघः। परितो बद्धः अपरः पश्चिमपादो यैरिति मल्लि०। न पृणाति सन्तोषयति पृ-अच्। शत्रौ, भिन्ने त्रि०। "अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे" इति मनुः "तमा समुद्रादपरे परे नृपाः" नैष०। पश्चिमायां दिशि स्त्री "अपरदिग्गणिकेति" माघः परकालवृत्तौ त्रि०। "पूर्व्वां सन्ध्यां जपन् तिष्ठेत् स्वकाले चापरां चिरमिति" मनुः। पश्चाद्वृत्तौ त्रि० "पूर्व्वापरौ तोयनिधी वगाह्य" कुमा०। ऋगवेदादिविद्यायां स्त्री। 'द्वे विद्ये विदितव्ये इति ह स्म ब्रह्मविदो वदन्ति परा चैवापरा च तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति" ऋ० भा० धृता श्रुतिः। अस्य च कालदेशादिनियमे सर्व्वनामकार्य्यम्। तत्र "पूर्व्वादिभ्यो नवभ्यो वा इति" पा०वा तत्कर्म। अपरत्वञ्च दैशिकं कालिकं च द्विविधं, तत्र स्वापेक्षया उदयाचलविप्रकृष्टत्वम् दैशिकमपरत्वम् स्वापेक्षयाधिकसूर्य्यस्पन्दनवत्त्वं कालिकम्। उक्तोदाहृतौ दैशिकम् कालिकन्तु। "अपरं भवतो जन्म परं जन्म विवस्वत" इति गीता। अल्पदेशवृत्तिरूपे व्याप्ये त्रि० "सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च। व्यापकत्वात् परापि स्यात् व्याप्यत्वादपरापि च" भाषा०। द्रव्यत्वादेः घटत्वाद्यपेक्षया अधिकदेशवृत्तित्वात् परत्वं सत्तापेक्षया-अल्पदेशवृत्तित्वात् अपरत्वमिति मुक्ता०। "द्रव्यत्वादिक जातिस्तु परापरतयोच्यते" इति भाषा०। "स्वायम्भुवस्य च मनो षड्वंश्या मनवोऽपरे" इति अपरकालिका भिन्ना वा इत्यर्थः। निकृष्टे। "भूमिरापोऽनलो वायुः खं मनोबुद्धिरेव च अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परामिति" गीता। तत्र भूम्यादीनामितरपदार्थप्रकृतित्वेऽपि जड़त्वात् संहत्य कारित्वात् स्वयमसमर्थत्वेन जीवस्य भोगाद्यर्थमेव प्रवृत्तिमत्त्वाच्च निकृष्टत्वम्। जीवस्य तु तदपेक्षया परत्वम्॥

उत्तरकालिकत्वात् तद्विकारलक्षणे कार्य्ये "तदेतद्ब्रह्माऽपूर्व्वमनपरमनन्तमिति" वृह०उप०। नास्ति अपरं कार्य्यं यस्येति भा०। वस्तुतः स्वरूपप्रच्युवाभावेन कूटस्थस्य न कार्य्यकारित्वमत एव "न कर्त्तृत्वं न कर्म्माणि लोकस्य सृजति प्रभुः अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव इति" गीतायाम् तस्याकर्त्तृत्वमुक्तं कर्त्तृत्वन्तु अज्ञानोपहितेश्वरस्येति न विरोधः। समुदायिनः शेषभागे 'अपररात्रः अपराह्णः एकदेशि स०। अस्य पूर्व्वपदस्थस्य पश्चादेशः पश्चार्द्धम् न० शेषार्द्धे। अपरस्मिन् भवः डिमच् पश्चिमः शेषभवे। प्रथमापञ्चम्यादिदेशकालवृत्ते रपरशब्दात् प्रथमाद्यर्थे अति। पश्चात्। अधिकमधःशब्दे दृश्यम्। अस्य दिग्वाचकत्वात् तेन समासे देशवाचिनः णिदादि तद्धिते उत्तरपदस्यैव वृद्धिः अपरपाञ्चालक इत्यादि।

**अपरक्त** त्रि० अपगतो रक्तः शोणितो यस्मात्। अपगतरक्तवर्णे अप+रन्ज–क्त। विरक्ते अनुरागशून्ये च त्रि०।

**अपरज** पु० अपरस्मिन् काले जायते जन–ड ७त०। रुद्रभेदे "नमः पूर्व्वजाय चापरजाय" चेति यजु० १६,२२।

**अपरति** स्त्री अप+रम–भावे क्तिन्। अविरतौ। [काले वा।

**अपरत्र** अव्य० अपरस्मिन् कालादौ। अपरस्मिन् देशे

**अपरत्व** न० अपरस्य भावः त्व। अपरभावे तच्च वैशेषिकोक्तो गुणभेदः। तदपि द्विविधं दैशिकं कालिकञ्च तत्स्वरूपमपरशब्दे उक्तम्। तत्र च कारणमपेक्षाबुद्धिविशेषः तस्य नाशाच्च परत्वापरत्वयोर्नाशः। "संयोगश्च विभागश्च परत्वञ्चापरत्वकमिति" "परापरत्वधीर्हेतुरेका नित्या दिगुच्यते" इति च भाषा०। तत्र दैशिकापरत्वं अल्पसूर्य्यसंयोगज्ञानजन्यं, कालिकं तु अल्पसूर्य्यपरिस्पन्दज्ञानजन्यमिति भेदः। कालिके कालोहेतुः दैशिके तु